# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 6 | गुणाः – ५० |
| विषयः – पुराणेतिहासः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – श्रीमन्महाभारते शान्तिपर्वणि आपद्धर्मपर्व | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ द्वयोः पद्ययोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।**

१ बाह्यश्चेत् विजिगीषुः स्याद् धर्मार्थकुशलः शुचिः।
जवेन सन्धिं कुर्वीत पूर्वभुक्तान् विमोचयेत्॥

२ अनागताविधाता च प्रत्युत्पन्नमतिश्च यः।
द्वावेव सुखमेधेते दीर्घसूत्री विनश्यति॥

३ माता पिता गुरुर्गोप्ता वह्निर्वैश्रवणोपमः।
सप्त राज्ञो गुणानेतान् मनुराह प्रजापतिः॥

**प्रश्नः २ आपद्ग्रस्तनृपधर्मान् धर्मस्य सूक्ष्मां गतिं च वर्णयत।**

**प्रश्नः ३ बलमहत्वं धनग्रहणाग्रहणविचारान् च लिखत।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या।**

१ ऋषीणां देवतानां च पितॄणां च महात्मनाम्।
श्रुतः पूर्वं मया धर्मो महानतिथिपूजने॥

२ सम्पश्यत जगत्सर्वं सुखदुःखैरधिष्ठितम्।
संयोगो विप्रयोगश्च पर्यायेणोपलभ्यते॥

३ मातरं पितरं वापि बन्धवान् सुहृदस्तथा।
जीवतो ये न पश्यन्ति तेषां धर्मविपर्ययः॥

**प्रश्नः ५ कपोतकथां तत्कृतातिथिसत्कारं सप्रसङ्गं वर्णयत।**

**प्रश्नः ६ श्रीनारदमुनिना प्रसारितः पुष्टः वृक्षमहिमानं च वर्णयत।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।**

१ सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम् ।
सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठितम् ॥

२ दमो नान्यस्पृहा नित्यं गाम्भीर्यं धैर्यमेव च ।
अभयं रोगशमनं ज्ञानेनैतदवाप्यते ॥

३ दमं निःश्रेयसं प्राहुर्वृद्धा निश्चितदर्शिनः ।
ब्राह्मणस्य विशेषेण दमो धर्मः सनातनः ॥

**प्रश्नः ८ तपसः सत्यस्य महत्त्वं च लिखत ।**

**प्रश्नः ९ धर्मार्थकामविषयकान् ग्रन्थोक्तविचारान् प्रतिपादयत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ महाभारते कति पर्वाणि सन्ति ?
२ महाभारतस्यापरं नाम किम् ?
३ महाभारतस्य कति आवृत्तयः ?
४ महाभारतस्य समीक्षितावृत्तिः कुतः प्रकाशिता जाता वर्तते ?
५ 'पर्व' शब्दस्य सप्तमी द्विवचनं किम् ?
६ 'तप' शब्दस्य पञ्चमी एकवचनं किम्?
७ कामक्रोधादि कति दोषाः निरूपिताः सन्ति ?
८ भीष्मः कस्मै धर्मान् कथयति ?
९ जनमेजयः कं शरणं याति ?
१० किं नाम दस्योः कथाप्रसङ्गः आगच्छति ?
११ ब्राह्मणस्य सङ्कटकाले कयोः कथाप्रसङ्गः वर्तते ?
१२ महाभारते कति श्लोकाः सन्ति ?
१३ महाभारते कूटश्लोकानां सङ्ख्या का ?
१४ महाभारतस्य मुख्यः नायकः कः ?
१५ महाभारतस्य मुख्यः रसः कः ?

****